पृश्नी, स्त्री, ( स्पृशति जलमिति । स्पृश+नि: । ततो वा ङीष् । ) वारिपर्णी । इति शब्दरत्नावली ॥ ( विवरणमस्या वारिपर्णीशब्दे ज्ञातव्यम् ॥ ) कुम्भिका । इति भूरिप्रयोगः ॥

पृष, उ सेके । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । क्त्वावेट् । ) उ, पर्षित्वा पृष्ट्वा । इति दुर्गादासः ॥

पृषत्, क्ली, ( पर्षति सिञ्चतीति । पृष सेचने +"वर्त्तमाने पृषद्बृहन्महदिति ।" उणा० २ । ८४ । इति । अतिप्रत्ययो गुणाभावश्च निपात्यते । शत्रुवदस्य कार्य्यं विज्ञेयम् । ) जलविन्दुः । इत्यमरः ।१।१०।६॥ यथा, "पृषत्परुषविषाणाग्रेण लुठति ।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः ॥ "पृषत् जलविन्दुस्तद्वत् अपरुषेण मृदुना विषाणाग्रेण लुठति सङ्कुचयति ।" इति तट्टीकायां श्रीधरस्वामी । इदं द्विवचनवहुवचनान्तमपि भवति ॥

पृषतः, पुं, (पर्षतीति । पृषि सेके+"पृषिरञ्जिभ्यां कित् ।" उणा० ३ । १११ । इति अतच् । स च कित् । ) विन्दुः । इत्यमरः । १।१०।६ ॥ (यथा, रघौ । ३ । ३ ।

"करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥" )

श्वेतविन्दुयुक्तमृगः । इति मेदिनी । ते, १३५ ॥ तत्पर्य्यायः । रङ्कुः २ शवलपृष्ठकः ३ । इति राजनिर्घण्टः ॥ ( यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "हरिणैणकुरङ्गकरालकृतमालशरभश्वदंष्ट्रा पृषतचारुष्करमृगमातृकाप्रभृतयो जङ्गाला मृगाः । कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च ॥"* ॥ द्रुपदराजस्य पिता । यथा, महाभारते । १ । १३१ । १७ ।

"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥"

मण्डलिसर्पान्तर्गतसर्पविशेषः । यथा,—
"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्प इत्यादिषु ॥" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

पृषताम्पतिः, पुं, (पृषतां विन्दूनां पतिर्नेता इत्यलुक् समासः । ) वायुः । इति जटाधरः ॥ ( यथा, माघे । ६ । ५५ ।

"गजपतिदयसीरपि हैमन-
स्तुहिनयन् सरितः पृषताम्पतिः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतातनुतापकृतं दृशाम् ॥" )

पृषताश्वः, पुं, ( पृषतो मृगविशेषोऽश्व इव गतिसाधनं वाहनो वा यस्य ।) वायुः । इत्यमरटीकायां भरतः ॥

पृषती, स्त्री, ( पृषत+स्त्रियां ङीप् । ) श्वेतविन्दुयुक्ता मृगी । इति मेदिनी । ते, १३५ ॥ (यथा, रघुः । ८ । ५६ ।

"पृषतीषु विलोलमीक्षितं
पवनाधूतलतासु विभ्रमाः ॥")

पृषत्कः, पुं, (पृष्यते सिच्यते चिप्यते इति । पृष+ अतिः । ततः संज्ञायां कन् । ) वाणः । इत्यमरः । २ । ८ । ८६ ॥ ( यथा, रघौ । ७ । ४५ ।

"अप्यर्द्धमार्गे परवाणलूना
धनुर्भृतां हस्तवतां पृषत्काः ॥")

पृषदश्वः, पुं, ( पृषन् मृगविशेषोऽश्व इव वाहको यस्य । ) वायुः । इत्यमरः । १ । १ । ६५ ॥ ( यथा, ऋग्वेदे । १ । ८७ । ४ ।

"स हि स्वसृत् पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः ॥"

राजर्षिभेदः । यथा, महाभारते ।२।८।१२ ।
"अश्वः सदश्वो वध्र्यश्वः पृथुवेगः पृथुश्रवाः ।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः ॥"

विरूपस्य पुत्त्रः । यथा, भागवते । ६ । ६ । १ ।
"विरूपः केतुमान् शम्भुरम्बरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् तत्पुत्त्रस्तु रथीतरः ॥")

पृषदाज्यं, क्ली, ( पृषद्भिः दधिविन्दुभिः सहितमाज्यम् । ) सदध्याज्यम् । दधिमिश्रितघृतम् । इत्यमरः । २ । ७ । २४ ॥ ( यथा, ऋग्वेदे । १० । ९० । ८ ।

"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"
"पृषदाज्यं दधिमिश्रमाज्यम् ।" इति तद्भाष्ये सायनः ॥ )

पृषद्बलः, पुं, ( पृषदेव बलमस्य । ) वाय्वश्वः । यथा,—

"धुविचमरदान्दोलः कुवेरस्य चामरानिलः ।
पृषद्बलस्तु वाय्वश्वः कुवेरे तु प्रमोदितः ॥"
इति शब्दमाला ॥

पृषन्तिः, पुं, ( पर्षति सिञ्चतीति । पृष सेचने+ अतिप्रत्ययः । निपातनात् साधुः । ) विन्दुः । यथा,—

"पयःपृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनैः ॥"
इति भरतधृतनामवतीविजयकाव्यम् ॥

पृषभाषा, स्त्री, (पर्षतीति । पृष सेके+कः । पृषाम्लतवर्षिणी भाषा यत्र । ) अमरावती । इति शब्दरत्नावली ॥

पृषाकरा, स्त्री, ( पृष+भावे क्विप् । पृषे सेचनाय आकीर्य्यते इति । आ+कॄ+अप्+टाप् । प्रातः सन्ध्यायाश्चास्या उपरि जलसेचनादेव तथात्वम् । ) क्षुद्रशिला । इति शब्दचन्द्रिका ॥ वाटखारा इति भाषा ॥

पृषातकं, क्ली, ( पृषन्तं पृषदाज्यम् आतकते हसतीति । तक+अच् । पृषोदरादित्वात् साधुः । ) दधियुक्तघृतम् । इति हेमचन्द्रः ॥

पृषोदरः, त्रि, पृषदुदरं यस्य । ("पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति तलोपः । ) मनीषादित्वात् तलोपः । इति दुर्गादासः ॥

"भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्य्ययात् ।
वर्णादेशाच्च गूढात्मा वर्णलोपात् पृषोदरः ॥"
इति गोयीचन्द्रधृतकारिका ॥

पृषोद्यानं, क्ली, क्षुद्रोपवनम् । मनीषादित्वात् पृषतस्तकारलोपः । इति मुग्धबोधटीकायां दुर्गादासः ॥

पृष्ठं, क्ली, ( पृष्यते सिच्यते इति । पृष "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्प्रत्ययेन निपातनात् सिद्धम् । ) शरीरपश्चाद्भागः । इत्यमरः । २ । ६ । ७८ ॥ पीठ इति भाषा ॥ ( यथा, मनौ । ४ । ७२ ।

"न विगर्ह्य कथां कुर्य्याद्बहिर्माल्यं न धारयेत् ।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥")

चरममात्रम् । इति मेदिनी । ठे, ७ ॥ ( स्तोत्रविशेषः । यथा, शतपथब्राह्मणे । ८ । १ । १ । ५ ।

"त्रिवृतस्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥")

पृष्ठग्रन्थिः, पुं, ( पृष्ठस्य ग्रन्थिः । ) गडुः । इति हेमचन्द्रः । ३ । ४४६ ॥ कुँज इति भाषा ॥

पृष्ठतः, [ स् ] व्य, ( पृष्ठ+"प्रतियोगे पञ्चम्यास्तसिः ।" ५ । ४ । ४४ । इत्यस्य "आद्यादिभ्य उपसंख्यानम् ।" इति वार्त्तिकोक्त्या तसिः । ) पश्चात् । यथा, भट्टिः । १ । २४ ।

"तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्रास्त्रधरः कुमारः ॥"

पृष्ठदेशे । (यथा, मनौ । ८ । ३०० ।
"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम् ॥")

पृष्ठदृष्टिः, पुं, ( पृष्ठे दृष्टिर्दर्शनं यस्य । ) भल्लूकः । इति राजनिर्घण्टः ॥

पृष्ठमांसादः, त्रि, ( पृष्ठे परोक्षे मांसाद इव । असमक्षमनिष्टजनकवाक्यकथनादस्य तथात्वम् । ) वाक्याभिधायी । इति त्रिकाण्डशेषः ॥ चोगोलखोर इति पारस्यभाषा । ( पृष्ठमांसमत्तीति । अण् । पृष्ठमांसभक्षके, त्रि ॥ )

पृष्ठमांसादनं, क्ली, ( पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनस्यास्यानिष्टजनकत्वात् । ) परोक्षे दोषकीर्त्तनम् । इति हेमचन्द्रः । ३ । २६५ ॥ तद्वति, त्रि ॥ ( पृष्ठमांस+अद्+ कर्त्तरि ल्युः । पृष्ठमांसभक्षके, त्रि । )

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दक्ष इत्यर्थः । ) पृष्ठास्थि । पिठेर दाँड़ा इति भाषा ॥ तत्पर्य्यायः । रीढ़कः २ । इति हेमचन्द्रः ॥ ( यथा, सुश्रुते शारीरस्थाने ६ अध्याये ।

"तत्र पृष्ठवंशमुभयतः प्रतिश्रोणी काण्डमस्थिनी कटीतरुणे नाम मर्म्मणी ।" ) स तु मासमात्रेण भवति । इति सुखबोधः ॥

पृष्ठवाट्, पृष्ठवाड्, [ ह् ] पुं, ( पृष्ठं युगपार्श्वं वहतीति । वह+ण्वि । ) युगपार्श्वगवृषः । पाँटे बाँधा गरु इति भाषा । इत्यमरः ॥ ( पृष्ठं पृष्ठभागं वहतीति । वह+ण्वि । पश्चाद्भागवाहकः । यथा, हरिवंशे भविष्यपर्व्वणि । ५५ । ३१ ।

"दारकं पृष्ठवाहन्तु कृत्वा केशव ईश्वरः ।